## आङ् मर्यादावचने । (८९/५९७)

[1]आङ इत्येष शब्दो मर्यादावचने कर्मप्रवचनीयसञ्ज्ञो भवति । अवधिर्मर्यादा । वचनग्रहणाद[2]भिविधिरपि गृह्यते । आ पाटलिपुत्राद् (२.३.१०/५९८) वृष्टो देवः । [3]आ कुमारं यशः पाणिनेः (म. भा. १.३४७) । आ सांकाश्यात् । आ मथुरायाः । मर्यादावचने इति किम् ? ईषदर्थे क्रियायोगे च मा भूत् ॥

## लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः । (९०/५५२)

लक्षणे, इत्थंभूताख्याने, भागे, वीप्सायां च विषयभूतायां प्रति परि अनु [4]इत्येते कर्मप्रवचनीयसञ्ज्ञा भवन्ति । लक्षणे तावत्–वृक्षं प्रति विद्योतते विद्युत् । [5]वृक्षं परि । वृक्षमनु । इत्थंभूताख्याने–साधुर्देवदत्तो मातरं प्रति । मातरं परि । [6]मातरमनु । भागे–यदत्र [7]मां प्रति स्यात् । मां परि [8]स्यात् । मामनु [9]स्यात् । वीप्सायाम्–वृक्षं वृक्षं प्रति सिञ्चति । [10]परि सिञ्चति । अनु सिञ्चति । लक्षणादिषु इति किम् ? ओदनं परिषिञ्चति ।

अथ परिशब्दयोगे पञ्चमी कस्मान्न भवति 'पञ्चम्यपाङ्परिभिः' (२.३.१०/५९८) इति ? वर्जनविषये सा विधीयते, अपशब्दसाहचर्यात् ॥

## अभिरभागे । (९१/५५३)

लक्षणादिषु [11]एव भागवर्जितेषु [12]अभिः कर्मप्रवचनीयसञ्ज्ञो भवति । वृक्षमभि विद्योतते [13]विद्युत् । साधुर्देवदत्तो मातरमभि । वृक्षं वृक्षमभि सिञ्चति । अभागे इति किम् ? भागः [14]स्वीक्रियमाणोंऽशः । यदत्र ममाभिष्यात् तद्[15]दीयताम् । [16]यदत्र मम भवति तद् दीयताम् इत्यर्थः ॥

## प्रतिः प्रतिनिधिप्रतिदानयोः । (९२/५९९)

मुख्यसदृशः प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । प्रतिनिधिविषये प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसञ्ज्ञो भवति । [17]अभिमन्युरर्जुनतः प्रति । [18]माषानस्मै तिलेभ्यः (२.३.११/६००) प्रति यच्छति ॥

## अधिपरी अनर्थकौ । (९३/५५४)

[19]अधिपरी शब्दौ अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसञ्ज्ञौ भवतः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति[20] । गत्युपसर्गसञ्ज्ञा[21]बाधनार्था कर्मप्रवचनीयसञ्ज्ञा विधीयते ॥

---

1. आङ्–वचने नास्ति ब. 2. अभिव्याप्तिः परिगृह्यते क. ड. फ. ह. 3. आकुमारं–साङ्काश्यात् नास्ति फ. ह. 4. इति कर्मप्रवचनीयसञ्ज्ञानि फ. 5. उदाहरणमिदं नास्ति फ. 6. पितरमनु फ. 7. मा ह. 8-9 स्यात् नास्ति फ. 10. वृक्षं वृक्षं इत्यधिकम् फ. 11. च ड. 12. अभिशब्दः फ. 13. विद्युत् नास्ति ह. 14. स्वीक्रियमाणस्य अंशः क. 15. भवते इत्यधिकम् ह. 16. यन्मां प्रभजति तत् फ. ह. 17. प्रतिनिधौ–इत्यधिकम् फ. 18. प्रतिदाने-इत्यधिकम् फ. 19. अधिपरि॰ ड. 20. कुत आगच्छति इत्यर्थः इत्यधिकम् फ. 21. बाधनार्थं फ.